# A

**21728** **120 MINUTES**

1. सांख्यमते पुरुषः कीदृशः?
   A) निर्लेपः B) अनित्यज्ञानगुणकः
   C) जडस्वरूपः D) नित्यज्ञानी

2. मालतीमाधवस्य कर्ता कः?
   A) श्रीहर्षः B) बाणः C) भवभूतिः D) एषु न कोऽपि

3. पञ्चीकृते एकैकस्मिन् भूते स्वांशः कियान् भवेत्?
   A) अर्धांशः B) पादांशः C) अष्टमांशः D) पूर्णांशः

4. ब्रह्मजिज्ञासापदे लुप्तषष्ठी कस्मिन् अर्थे भवति?
   A) शेषे B) कर्मणि C) कर्तरि D) करणे

5. हन्ता चेन्मन्यते मन्यते हन्तुम् इत्यत्र हन्तुं इत्यस्य अर्थः कः?
   A) हननकर्तारं B) हननकर्मभूतं
   C) हननं कृतं D) हननं कर्तुं

6. अव्यक्तोऽयम् अचिन्त्योयं - कः?
   A) देहः B) आत्मा C) ईश्वरः D) योगः

7. लोकादिम् अग्निं तमुवाच तस्मै| कस्मै उवाच?
   A) नचिकेतसे B) यमाय C) पित्रे D) ऋत्विजे

8. 'छायातपौ ब्रह्मविदो वदन्ति' इति मन्त्रे छायातपौ कौ?
   A) जीवः ब्रह्म च B) शरीरं आत्मा च
   C) बुद्धिः जीवः च D) तमः सूर्यः च

9. जन्मादि इत्यत्र कथं विग्रहः?
   A) जन्मनः आदि B) जन्म अत्ति
   C) जन्म च आदि च D) जन्म आदिः यस्य

10. समन्वयसूत्रे केषां समन्वयः विवक्षितः?
    A) वेदान्तवाक्यानां B) जन्मस्थितिलयानां
    C) सर्वेषाम् आत्मनां D) बहूनाम् अविद्यानां

11. भारतीयसंगीतसंप्रदायस्य मूलभूतः वेदः कः?
    A) ऋग्वेदः B) यजुर्वेदः C) सामवेदः D) अथर्ववेदः

12. स्कृतस्तोत्रकाव्येषु प्रथममिति किं कथ्यते?
    A) भक्तिमञ्जरी B) मुकुन्दमाला
    C) नारायणीयं D) गीतगोविन्दं

13. केषां रक्षार्थम् अध्येयं व्याकरणम् इति महाभाष्ये उच्यते?
A) वर्णानां B) शब्दानां C) वेदानां D) सर्ववाचां

14. आयुर्वेदे surgeryविषया चिकित्सा का?
A) शल्यचिकित्सा B) व्रणचिकित्सा
C) रसायनं D) अगदतन्त्रं

15. गगनं गगनाकारम् इत्यत्र कः अलङ्कारः?
A) रूपकम् B) अनन्वयः C) उपमा D) दृष्टान्तः

16. कस्मिन् गणे आदिमध्यावसानेषु सर्वाणि गुरुभूतानि अक्षराणि एव घटितानि स्युः?
A) मगणे B) नगणे C) भगणे D) जगणे

17. या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री – अत्र किं वृत्तम्?
A) मन्दाक्रान्ता B) उपजातिः
C) शार्दूलविक्रीडितं D) स्रग्धरा

18. सामान्येन विशेषस्य विशेषेण सामान्यस्य वा कीर्तनं कस्मिन् अलङ्कारे भवेत्?
A) अर्थान्तरन्यासे B) अनन्वये
C) दीपके D) रूपके

19. का भाषा PIE भाषाकुटुम्बे नान्तर्भवति?
A) Sanskrit B) Tamil C) English D) German

20. संस्कृतभाषायां कस्य नियमस्य प्रसक्तिः नास्ति?
A) Grimm's law B) Grassman's Law
C) Fortunatov's law D) None of the above

21. एकाकिनीं कथमहं भवतीं त्यजेयम् – कः कां प्रति वदति?
A) रामः सीतां B) लक्ष्मणः सीतां
C) रावणः सीतां D) रामः शूर्पणखां

22. वृत्तानि अक्षरसंख्यया योजयत –
a. वसन्ततिलका 17
b. मन्दाक्रान्ता 21
c. शार्दूलविक्रीडितं 19
d. स्रग्धरा 14

A) a-17, b-19, c-21, d-14 B) a-14, b-17, c-19, d-21
C) a-17, b-14, c-21, d-19 D) a-21, b-19, c-17, d-14

23. समासोक्तेः अलङ्कारस्य उदाहरणं किम्?
A) नायं सुधांशुः किं तर्हि व्योमगङ्गासरोरुहं
B) त्वत्सूक्तिषु सुधा राजन् भ्रा न्ताः पश्यन्ति तां विधौ
C) अयमास्ते विना शंभुः तार्तीयीकं विलोचनम्

D) अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः

24. प्रायः, शङ्के, नूनम् इत्यादिपदानां प्रयोगः कम् अलङ्कारं सूचयेत्?
A) दीपकः B) प्रतीपं C) उत्प्रेक्षा D) रूपकम्

25. कर्णशब्दात् तृतीयाबहुवचने वैदिकप्रयोगः कः?
A) कर्णैः B) कर्णभिः C) कर्णेभिः D) कर्णाभिः

26. जिज्ञासा इत्यत्र ज्ञाधातोः शंकरभाष्ये उक्तः अर्थः कः?
A) विचारः B) अवगतिः C) स्मृतिः D) श्रवणं

27. हिंस इति पदस्य सिंह इति विपरिणामः केन प्रकारेण?
A) Metathesis B) Syncope C) Aphaeresis D) Analogy

28. रसतन्त्रविज्ञाने नागार्जुनस्य कृतिः का?
A) रसार्णवः B) रसकौमुदी
C) रसरत्नाकरः D) न एषु कोऽपि

29. मूर्धन्यवर्णानां(Cerebrals) उत्पत्तिप्रतिपादकः नियमः कः?
A) Fortunatov's law B) Grimms law
C) Verner's law D) Law of palatalisation

30. भर्तृस्नेहात् सा हि दग्धाप्यदग्धा – का?
A) वासवदत्ता B) दमयन्ती
C) सुदक्षिणा D) एतासु न कापि

31. अधीती इत्यस्य योगे कर्मणि का विभक्तिः युज्यते?
A) द्वितीया B) चतुर्थी C) षष्ठी D) सप्तमी

32. वाक्परिमितपदानि कतिविधानि?
A) त्रीणि B) चत्वारि C) पञ्च D) षट्

33. केवलान्वयिधर्मः कः?
A) आकाशत्वं B) भावत्वं C) प्रमेयत्वं D) ज्ञानत्वं

34. लक्षणस्य प्रयोजनभूता व्यावृत्तिः नाम का?
A) अभावः B) वर्तमानत्वं C) अवृत्तित्वं D) इतरभेदः

35. वायुः प्रत्यक्षः इत्यनुमाने कः उपाधिः?
A) रूपवत्त्वं B) स्पर्शवत्त्वं
C) उद्भूतरूपवत्त्वं D) रूपरहितत्वं

36. साध्याभाववति वृत्तित्वं किम्?
A) व्याप्तिः B) व्यभिचारः C) पक्षता D) विरोधः

37. पटं प्रति तन्तुसंयोगः कीदृशं कारणम्?

A) समवायिकारणम् B) असमवायिकारणम्

C) निमित्तकारणम् D) सहकारिकारणम्

38. प्रामाण्यम् परतो ज्ञायते इति कस्य मतम्?

A) सांख्यस्य B) मीमांसकस्य C) वेदान्तिनः D) नैयायिकस्य

39. क्षित्यादिकं सकर्तृकं इत्यनुमाने कः हेतुः?

A) कार्यत्वं B) सावयवत्वं C) पदार्थत्वं D) शरीराजन्यत्वं

40. अवनिजः इति द्विजः इति च कौ उच्येते?

A) शुक्रः सोमः च B) भौमः गुरुः च

C) सूर्यः चन्द्रः च D) गुरुः शुक्रः च

41. विधेरपि स्वारसिकः प्रयासः किमर्थः इति हंसः कथयति?

A) नलदर्शनाय B) जगज्जननाय

C) हंसप्रेषणाय D) योग्यसमागमाय

42. निःश्वासान्धः इवादर्शः इत्यत्र कस्मिन् पदे ध्वनिः?

A) इवपदे B) आदर्शपदे

C) निःश्वासपदे D) अन्धपदे

43. “सर्वः सगन्धेषु विश्वसिति| उभावपि खलु आरण्यकौ|” - अत्र उभौ कौ?

A) शकुन्तला दुष्यन्तः च B) शकुन्तला मृगपोतः च

C) शकुन्तला वृक्षलता च D) शकुन्तला प्रियंवदा च

44. गङ्गायां घोषः इत्यत्र लक्षणायाः प्रयोजनं किम्?

A) पदलाघवं B) प्रवाहबोधनिवृत्तिः

C) शैत्यबोधः D) नास्ति प्रयोजनं

45. योजयत –

a. प्रत्यक्षं 1. वाक्यार्थबोधः

b. अनुमानं 2. विशिष्टवैशिष्ट्यपरामर्शः

c. उपमितिः 3. ज्ञानाऽकरणकं ज्ञानम्

d. शाब्दज्ञानम् 4. पदपदार्थसंबन्धज्ञानम्

A) a-1, b-2, c-3, d-4 B) a-3, b-2, c-4, d-1

C) a-4 b-3, c-2, d-1 D) a-3, b-4, c-1, d-2

46. उन्मादवासवदत्ता केन रचिता?

A) शक्तिभद्रेण B) बाणकविना C) भासेन D) एषु न केनापि

47. परस्मैपदानां लिटि तिप : आदेश :

A) णल् B) सिपू

C) अम् D) उक्तेभ्यः अन्यदेव

48. योजयत

a. वर्णविन्यासवक्रता — 1. अनुप्रासः

b. पदपूर्वार्धवक्रता — 2. मैथिली तस्य दाराः

c. प्रत्ययवक्रता — 3. अलङ्काराः

d. वाक्यवक्रता — 4. रामोऽस्मि सर्वं सहे

A) a-1, b-2, c-3, d-4 B) a-2, b-3, c-1, d-4
C) a-1, b-3, c-4, d-2 D) a-1, b-4, c-2, d-3

49. श्रुतेरिवार्थं स्मृतिरन्वगच्छत् – अत्र श्रुतिस्मृत्योः उपमेयभूतौ कौ?

A) धेनुः दिलीपः च B) दिलीपः सुदक्षिणा च
C) एषु न कोऽपि D) धेनुः सुदक्षिणा च

50. यत्र अङ्गं तु रसादयः तत्र कः प्रभेदः ध्वनिकारेण उच्यते?

A) रसवदलङ्कारः B) असंलक्ष्यक्रमध्वनिः
C) संलक्ष्यक्रमध्वनिः D) अविवक्षितवाच्यध्वनिः

51. क्षिणापथात् आगतं नाटकम् इति किम् उच्यते?

A) शाकुन्तलं B) आश्चर्यचूडामणिः
C) उत्तररामचरितं D) स्वप्नवासवदत्तं

52. वसिष्ठधेनुं तां भूपतिः अन्वगच्छत् – कथमिव?

A) छायेव B) वत्स इव C) स्मृतिरिव D) पत्नीव

53. कविव्यापारवक्रत्वप्रकाराः संभवन्ति कति?

A) पञ्च B) षट् C) सप्त D) अष्ट

54. गौणलक्षणायाः उदाहरणं किम्?

A) कुन्तः प्रविशन्ति B) गौर्वाहीकः
C) गङ्गायां घोषः D) आयुः घृतं

55. निर्मक्षिकम् इति पदे कस्मिन् अर्थे अव्ययसमासः?

A) अधिकार्थे B) अर्थाभावे C) अत्ययार्थे D) समीपार्थे

56. इमे इति रूपं कस्मिन् लिङ्गे असाधु भवेत्?

A) पुल्लिङ्गे B) स्त्रीलिङ्गे
C) नपुम्सके D) न त्रिष्वपि

57. सतां हि संदेहपदेषु वस्तुषु प्रमाणं किम् उच्यते?

A) धर्मशास्त्रवचनं B) महतां वचनं
C) अन्तःकरणप्रवृत्तिः D) न किमपि

58. भैमी इति का नायिका उच्यते?

A) सुदक्षिणा B) दमयन्ती
C) वासवदत्ता D) न कापि

59. यथा मम आर्यपुत्रः, तथैव आर्यायाः वासवदत्तायाः इति का कथयति?

A) पद्मावती B) चेटी C) वासवदत्ता D) मधुकरिका

60. नैषधीये तृतीयसर्गे विषयः कः?

A) दमयन्तीवर्णनं B) हंसस्य नलगुणवर्णनं

C) प्रेमवर्णनं D) स्वयंवरवर्णनं

61. गृहप्रवेशस्य मुख्यः राशिप्रभेदः कः?

A) चरराशिः B) स्थिरराशिः C) उभयराशिः D) अनुभयराशिः

62. स्यात् वत्सरः चौलवत् इति कस्मिन् कर्मणि उच्यते?

A) अन्नप्राशने B) अक्षरारम्भे C) उपनयने D) विवाहे

63. विचारमूढः प्रतिभासि मे त्वं – कः कं वदति?

A) दिलीपः सिंहं B) सिंहः दिलीपं

C) धेनुः दिलीपं D) धेनुः सिंहं

64. योजयत

| | |
|---|---|
| a. भास्करः | 1. बृहज्जातकं |
| b. वराहमिहिरः | 2. लीलावती |
| c. कमलाकरः | 3. सारावलिः |
| d. कल्याणवर्मा | 4. तत्वविवेकं |

A) a-1, b-2, c-3, d-4 B) a-1, b-3, c-2, d-4

C) a-2, b-1, c-4, d-3 D) a-2, b-3, c-1, d-4

65. नीलकण्ठसोमयाजिनः कृतिषु का न अन्तर्भवति?

A) सिद्धान्तशिरोमणिः B) आर्यभटीयभाष्यम्

C) तन्त्रसंग्रहः D) ज्योतिर्मीमांसा

66. एतेषु कः षट्सु दोषेषु परिगणितः?

A) अमावास्या B) भौमवारः C) चरराशिः D) अधिमासः

67. स्त्रीपुरुषौ कस्याः राशेः चिह्नं प्रयुज्यते?

A) मेषराशेः B) ऋषभराशेः C) मिथुनराशेः D) तुलाराशेः

68. श्रोणा(श्रवण)नक्षत्रं कस्यां राशौ अन्तर्भवति?

A) धनुषि B) वृश्चिके C) कुम्भे D) मकरे

69. तत् त्वमसि इति महावाक्ये तत्पदस्य लक्ष्यार्थः कः?

A) सर्वज्ञब्रह्म B) अनुपहितचैतन्यं
C) अज्ञानसमष्टिः D) संसारी जीवः

70. सिंहराशेः अधिपतिः कः?
A) सूर्यः B) शुक्रः C) गुरुः D) सोमः

71. ज्योतिषे स्कन्धत्रयं किम्?
A) दिनपक्षमासाः B) सिद्धान्तहोरासंहिताः
C) बीजफलितग्रहाः D) जातकमुहूर्तकरणानि

72. एकैकस्याः राशेः कियान् नक्षत्रांशः भवति?
A) सपादनक्षत्रद्वयं B) सार्धनक्षत्रद्वयं
C) पादोननक्षत्रत्रयं D) न पूर्वोक्तं किमपि

73. गुरोः स्वक्षेत्रं किम्?
A) मीनराशिः B) मेषराशिः C) मिथुनराशिः D) कन्याराशिः

74. कालपुरुषस्य कः अवयवः मेषराशिः उच्यते?
A) शिरः B) उरः C) वस्तिः D) पादः

75. अन्नप्राशनं जन्मनोऽधि कस्मिन् काले कार्यम्?
A) चतुर्थे मासि B) षष्ठे मासि
C) अष्टमे मासि D) प्रथमे वर्षे

76. षट् दोषाः कुत्र वर्ज्याः ?
A) सर्वत्र पुण्यकर्मणि B) दिनमासकार्यतः अन्यत्र
C) मासवर्षकार्येषु D) वर्षकार्यतः अन्यत्र

77. घटप्रत्यक्षे कः संनिकर्षः?
A) संयोगः B) संयुक्तसमवायः
C) समवायः D) समवेतसमवायः

78. केरलीयज्योतिषविज्ञानपरम्परायाः प्रथमप्रवर्तकः कः?
A) माधवन् नम्बूतिरि B) नीलकण्ठसोमयाजी
C) राम पोदुवाल् D) अच्युत पिषारटि

79. यवनभाषानिपुणः इति प्रसिद्धः ज्योतिषाचार्यः कः?
A) ब्रह्मगुप्तः B) आर्यभटः
C) भास्करः D) वराहमिहिरः

80. उपेन्द्रः इत्यत्र कः संधिः?
A) यण्संधिः B) वृद्धिसंधिः C) गुणसन्धिः D) दीर्घसंधिः

81. श्वातीनक्षत्रस्य देवता का?
A) अग्निः B) वरुणः C) इन्द्रः D) वायुः

82. वाग् हरिः इति स्थिते संधिविधायकं सूत्रं किम्?
A) झलां जश् झशि B) झयो होऽन्यतरस्यां
C) झलां जशोऽन्ते D) शश्छोऽटि

83. तत्पुरुषः समानाधिकरणः कः समासः?
A) द्वन्द्वः B) द्विगुः C) बहुव्रीहिः D) कर्मधारयः

84. अस्मद् इति कतमा विभक्तिः?
A) प्रथमा B) पञ्चमी C) षष्ठी D) न काऽपि

85. आद, जघास इत्यनयोः किं रूपम् साधु?
A) जघास इति साधु B) आद इति साधु
C) उभयम् असाधु D) उभयं साधु

86. समवप्रविभ्यः कस्य आत्मनेपदं विधीयते?
A) गम् धातोः B) स्था धातोः C) अस् धातोः D) दृश् धातोः

87. स्वयम् अध्यापिका इत्यर्थे कः प्रयोगः असाधुः?
A) उपाध्यायी B) उपाध्यायानी
C) उपाध्याया D) उपाध्यापिका

88. महाभाष्यरीत्या नामपदस्य अर्थः कः?
A) आकृतिः B) द्रव्यं
C) आकृतिः द्रव्यं च D) अन्यदेव

89. पारिमाण्डल्यं नाम किम्?
A) परमाणुः B) द्व्यणुकं
C) अणुत्वपरिमाणं D) अणुत्वजातिः

90. सदसदनिर्वचनीयं किम्?
A) ब्रह्मतत्त्वं B) जीवतत्त्वं
C) ईश्वरतत्त्वं D) अविद्यातत्त्वं

91. ब्रह्मणः लक्षणं सूत्रे किम् उक्तम्?
A) सत्यज्ञानस्वरूपत्वं B) जिज्ञास्यतत्त्वं
C) जन्मादिकारणत्वं D) सर्वज्ञतत्त्वं

92. 'तत्तु समन्वयात्' इति सूत्रे 'तत्'पदस्य कः अर्थः?
A) शास्त्रं B) ब्रह्म C) जन्मादि D) प्रसिद्धं

93. अपरिहार्ये अर्थे न त्वं शोचितुमर्हसि| सः अर्थः कः?
A) जातस्य मृत्युः B) युद्धे मृतस्य परलोकः

C) आत्मनः नित्यत्वं D) सुखदुःखभोगः

94. संगात् संजायते कामः, कामात् कः अभिजायते?
A) संमोहः B) क्रोधः C) बुद्धिनाशः D) विभ्रमः

95. नचिकेतसः पित्रा यागदक्षिणात्वेन काः दत्ताः?
A) पीतोदकाः गावः B) वित्तभूहिरण्याद्याः
C) बहुपीनाः गावः D) न किमपि

96. सा काष्ठा सा परा गतिः – का?
A) मनः B) बुद्धिः C) अव्यक्तं D) पुरुषः

97. मन्दः योगक्षेमात् किं वृणीते?
A) योगं B) श्रेयः C) प्रेयः D) क्षेमं

98. वेदाङ्गेषु वर्णस्थानस्वरादिविवेचकं किम्?
A) शिक्षा B) व्याकरणं C) छन्दः D) कल्पः

99. गुणगुणिनोः संबन्धः कः?
A) कालिकः B) अभेदः C) संयोगः D) समवायः

100. वायोः अनुमाने किं लिङ्गम्?
A) शब्दः B) गन्धः C) स्पर्शः D) न कोऽपि

101. नित्यविज्ञानमेव आत्मा इति किं मतम्?
A) न्यायमतं B) बौद्धमतं C) जैनमतं D) वेदान्तमतं

102. पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदुःखैर्नवैः – कस्य वचनम् इदम्?
A) कण्वमुनेः B) दुष्यन्तस्य
C) शकुन्तलायाः D) न कस्यापि

103. सुरभि चन्दनं इति प्रत्यक्षं कीदृशम्?
A) लौकिकं B) अलौकिकं C) दिव्यं D) भ्रमः

104. वैशेषिके तमः किंरूपम् उच्यते?
A) दर्शनाभावरूपं B) संनिकर्षाभावरूपं
C) तेजोऽभावरूपं D) कृष्णद्रव्यरूपं

105. वेदान्तशास्त्रस्य अधिकारी कः?
A) साधनचतुष्टयवान् B) पूर्वमीमांसाज्ञानसंपन्नः
C) इतरशास्त्रज्ञानवान् D) अविद्यावान् संसारिजीवः

106. अधोदत्तेषु किं साधनचतुष्टये अन्तर्गतम्?
A) मुमुक्षुत्वं B) जिज्ञासा C) वेदाध्यायः D) कर्ममीमांसा

107. इन्द्रशत्रुः इत्यत्र कुतः अपराधः उदाहृतः?

A) वर्णतः B) पादतः C) स्वरतः D) सर्वतः

108. भयशब्दयोगे का विभक्तिः प्रयुज्यते?

A) द्वितीया B) तृतीया C) चतुर्थी D) पञ्चमी

109. शाङ्र्गरवशब्दात् स्त्रीप्रत्ययः कः भवेत्?

A) ङीन् B) ङीण् C) ङीप् D) ङीष्

110. टितः केषां टेः ए आदेशः?

A) परस्मैपदानां B) आत्मनेपदानां

C) उभयपदानां D) न पूर्वोक्तानां

111. वायुः कीदृशः?

A) रूपवान् स्पर्शवान् च B) रूपस्पर्शाऽभाववान्

C) स्पर्शाभाववान् रूपवान् D) रूपाभाववान् स्पर्शवान्

112. होरा इति पदं कस्मात् पदात् निष्पन्नम्?

A) राहुः B) होमराशिः C) अहोरात्रं D) **hour**

113. वह्निमान् इति साध्ये कः सपक्षः?

A) पर्वतः B) महानसः C) महाह्लदः D) तेजः

114. अग्निना सिञ्चति इति वाक्ये कस्य विरहात् न शाब्दबोधः?

A) आकाङ्क्षाविरहात् B) योग्यताविरहात्

C) संनिधिविरहात् D) तात्पर्यविरहात्

115. त्रैकालिकः संसर्गाभावः कः?

A) प्रागभावः B) प्रध्वंसाभावः

C) अत्यन्ताभावः D) अन्योन्याभावः

116. वेदस्य अङ्गेषु चक्षुःस्थानं प्राप्तं किम्?

A) छन्दः B) निरुक्तं C) व्याकरणम् D) ज्योतिषं

117. अधोदत्तेषु कः न उभयपदी धातुः?

A) पच् B) कृञ् C) दाञ् D) वृतु

118. करवै इति रूपं कस्मिन् लकारे युज्यते?

A) लोट् B) लृट् C) विधिलिङ् D) आशीर्लिङ्

119. दण्डिनः पदलालित्यम् इत्यस्य उदाहरणभूतं काव्यं किम्?

A) दशकुमारचरितं B) पारिजातापहरणं

C) मालतीमाधवं D) विश्वगुणादर्शः

**120.** काव्यस्य आत्मा स एवार्थः – कः?

**A)** वाच्यार्थः **B)** प्रतीयमानार्थः

**C)** लक्ष्यार्थः **D)** शब्दरूपः एव

---